# श्रीदत्तात्रेयस्तवः

Shri Dattatreyastavah

sanskritdocuments.org

November 10, 2018

# Shri Dattatreyastavah

# શ્રીદત્તાત્રેયસ્તવઃ

## Sanskrit Document Information

Text title : dattAtreyastavaH

File name : dattAtreyastavaH.itx

Category : deities_misc, sachchidAnanda-shivAbhinava-nRisiMhabhAratI, dattatreya

Location : doc_deities_misc

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

November 10, 2018

*sanskritdocuments.org*

# શ્રીદત્તાત્રેયસ્તવઃ

દત્તાત્રેયપદાબ્જં વિત્તાધીશાધિદેવવર્યેડ્યમ્ ।
હૃત્તાપહારચતુરં ચિત્તામલભાવસિદ્ધયે નૌમિ ॥ ૧॥

અનસૂયાસુતમીડે વનસઞ્ચારપ્રસક્તચેતસ્કમ્ ।
કનકન્નપ્રદાનનિરતં વનમાલાભૂષિતગ્રીવમ્ ॥ ૨॥

અવિમુક્તસ્નાનરતં કોલ્હાપુરમધ્યમન્ત્રજપશીલમ્ ।
સહ્યાદ્રિશયનલોલં માધૂકરભૈક્ષ્યભોજનં વન્દે ॥ ૩॥

આશામ્બરં પ્રપદ્યે પાશાપહમાશુ પાદનમ્રાણામ્ ।
કેશાવધૂતસૂર્યં કાશાગ્રચલન્મનોનિરોધાય ॥ ૪॥

ઔદુમ્બરતરુમૂલે કૃતવાસં કૃષ્ણભક્તિદાનરતમ્ ।
ઔદુમ્બરાદિદિવ્યક્ષેત્રાવાસં નમામિ યોગીશમ્ ॥ ૫॥

શરદિન્દુતુલ્યવદનં કરરાજદ્બોધમુદ્રમતિસુલભમ્ ।
તરણાય ભવપયોધેઃ શરણં યાસ્યામિ દત્તયોગીન્દ્રમ્ ॥ ૬॥

કૃતવીર્યપુત્રદેશિકમિન્દુપ્રતિમાનવદનકઞ્જાતમ્ ।
બિમ્બાધરમનસૂયામુખપદ્માર્કં નમામિ ગુરુદત્તમ્ ॥ ૭॥

કૃત્તાઘવૃન્દ નમતાં ચિત્તામ્બુજમધ્યસંસ્થ ભક્તાનામ્ ।
દત્તાત્રેય કૃપાબ્ધે યત્તાક્ષારાધ્યચરણ માં પાહિ ॥ ૮॥

ક્રવ્યાદવૈરિરૂપો નવ્યામ્બુદસન્નિકાશદેહરુચિઃ ।
ભવ્યાય ભવતુ યોગી નિર્વ્યાજદયાસુધામ્બુધિઃ કોઽપિ ॥ ૯॥

ગતિવિજિતમત્તનાગં મતિદાનધુરન્ધરં પ્રણમ્રેભ્યઃ ।
યતિતતિપૂજિતપાદં પતિતાવનદીક્ષમેનમાકલયે ॥ ૧૦॥

ગોરક્ષકમુખયોગિભિરાદરતઃ સેવ્યમાનપદપદ્મમ્ ।
ગોબ્રાહ્મણહિતકારણમત્રેઃ સુતમાતનોમિ હૃત્પદ્મે ॥ ૧૧॥

ઘુટિકાઞ્જનમુખસિદ્ધીર્ઘટિકાતઃ પ્રાપ્નુવન્તિ યદ્ભક્તાઃ ।
સ્ફટિકાક્ષમાલિકાઢ્યં તડિદાભં નૌમિ તં દત્તમ્ ॥ ૧૨॥

દિનનાથતુલ્યવસનં દિષ્ટ્યૈકપ્રાપ્યચરણપાથોજમ્ ।
દિવિ ભુવિ પાતાલે ચ પ્રચરન્તં નૌમિ યોગિનં કઞ્ચિત્ ॥ ૧૩॥

બાલોન્મત્તસદૃક્ષં કાલોત્પન્નાશનેન સન્તુષ્ટમ્ ।
માલોલ્લસદ્ગલતટં કાલોચ્છિત્ત્યૈ નમામિ દત્તમુનિમ્ ॥ ૧૪॥

ભરતાગ્રજભક્તાગ્ર્યં ભદ્રાણિ દિશન્તમાશુ નમ્રેભ્યઃ ।
ભવભીતિભઞ્જનચણં દત્તાત્રેયં નમામિ મોદેન ॥ ૧૫॥

ભવનીકૃતાનતહૃદં ભક્તાજ્ઞાનેભદલનપઞ્ચાસ્યમ્ ।
ભસિતાવલિપ્તગાત્રં ભવ્યકરં નૌમિ દત્તમુનિવર્યમ્ ॥ ૧૬॥

યસ્યાષ્ટવિધા મન્ત્રાઃ શીઘ્રં સિદ્ધિપ્રદાયકાસ્તિષ્યે ।
તસ્યાઙ્ઘ્રિપઙ્કજમહં દત્તાત્રેયસ્ય નૌમિ યોગીશઃ ॥ ૧૭॥

યાગાદિકર્મલભ્યં ભોગાલિં નમ્રપઙ્ક્તયે દદતમ્ ।
યોગાધિરૂઢમનિશં નાગાધિપશાયિનં નમસ્યામિ ॥ ૧૮॥

રવધૂતહંસગર્વં નવનવકવિતાપ્રદાનધૌરેયમ્ ।
વિધિહરિશિવસ્વરૂપં પ્રવણં વન્દે નતાવને કઞ્ચિત્ ॥ ૧૯॥

વૈરાગ્યદાનનિરતં તીરાતિક્રાન્તવૈભવોપેતમ્ ।
કારાબન્ધવિમોચકમૈરાવતયાયિસેવિતં નૌમિ ॥ ૨૦॥

શરણાગતપરિરક્ષણનિરતં તરુણં તમાલસમદેહમ્ ।
સરસિજસદૃક્ષનયનં શરણં યાસ્યામિ દત્તમુનિનાથમ્ ॥ ૨૧॥

કથિતાગમાર્થસારં મથિતાખિલદુઃખકારણાવિદ્યમ્ ।
પથિ પરમે સ્થિતમનિશં શિથિલિતપાપૌઘમાશ્રયે દત્તમ્ ॥ ૨૨॥

શીર્ષત્રયેણ સહિતં શીર્ષં વેદત્રયસ્ય નતલોકાન્ ।
સમ્બોધયન્તમનિશં ભાવયતુ સ્વાન્તમાદરાદ્યમિનમ્ ॥ ૨૩॥

સ્મૃતિમાત્રતુષ્ટહૃદયં મતિદં તરસાઙ્ઘ્રિનમ્રલોકાય ।
શિતિકણ્ઠમિત્રમીડે કૃતિનાં પ્રત્યક્ષમન્વહં દત્તમ્ ॥ ૨૪॥

ગોરક્ષાદ્યૈર્મુખ્યસુશિષ્યૈઃ પરિવીતં
ગોવિપ્રાણાં પોષણસક્તં કરુણાબ્ધિમ્ ।

ગોલક્ષ્મીશામ્બુજભવગિરિજાસખરૂપં
દત્તાત્રેયશ્રીપદપદ્મં પ્રણતોઽસ્મિ ॥ ૨૫॥

ઇતિ શૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતઃ શ્રીદત્તાત્રેયસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*Shri Dattatreyastavah*
pdf was typeset on November 10, 2018

Please send corrections to *sanskrit@cheerful.com*